Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-मनोरमा

६६
वे-सं

प्रथमो भागः

पं० आचार्य प्रियव्रत विद्या वाचस्पति एम० ए०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9136

गुरुकुल कांगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि
न लगायें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-मनोरमा

प्रथमो भागः

सहज शिक्षा प्रणाली (डाइरेक्ट मेथड) के आधार पर

[कक्षा ६ के विद्यार्थियों के लिए]

आचार्य प्रियव्रत वेदवाचस्पति
गुरुकुल कांगड़ी
ग्रंथ संग्रह.....
9136

सम्पादक —

साहित्याचार्य पं० सीताराम चतुर्वेदी

एम. ए., बी. टी., एल-एल. बी.

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय

प्रकाशक —

सरस्वती मन्दिर

जतनबर, बनारस

R 876,CHA-S
9136

१९५१]

[मूल्य ।-)॥।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्रक—बालकृष्ण शास्त्री,
ज्योतिष प्रकाश प्रेस, विश्वेश्वरगंज, बनारस ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्तव्य

संस्कृत-मनोरमा की कई विशेषताएँ हैं। प्रथम विशेषता यह है कि इसमें मातृभाषा हिन्दीका संस्कृतके साथ अन्तर्योग है। स्कूलोंमें संस्कृतकी शिक्षा प्रारम्भ करनेसे पाँच वर्ष पूर्व ही बालक अपनी मातृभाषा सीखना आरम्भ कर देता है। इन पाँच वर्षोंमें वह अनेक ऐसे शब्द जान लेता है जो या तो संस्कृतके तत्सम शब्द होते हैं या तद्भव। अतः यह परम आवश्यक है कि संस्कृत प्रारम्भ करते समय शिक्षा-शास्त्रके सिद्धान्तके अनुसार ज्ञातसे अज्ञातकी ओर चला जाय अर्थात् मातृभाषाके परिचित शब्दोंका आश्रय लेकर संस्कृतकी शिक्षा दी जाय। इस प्रकारकी समन्वय दृष्टि रखनेसे दोनों भाषाओंके ज्ञानकी पुष्टि होगी, संस्कृत सीखनेमें सुगमता होगी तथा संस्कृत व्याकरणके भूतका जो डर लोगोंके मनमें बैठा दिया गया है वह भी भाग जायगा।

दूसरी विशेषता यह कि हमने व्याकरणको सहायक अथवा सेवककी भाँति काममें लिया है, स्वामीकी भाँति नहीं। आवश्यकता पड़ने पर संस्कृतका अध्यापक संस्कृतके विशेष प्रयोगोंकी तुलना हिन्दीके तद्वत् प्रयोगों से कर सकता है।

तीसरी विशेषता यह है कि इसमें संस्कृतकी शिक्षा चित्रोंमें आए हुए विषयों पर बातचीत द्वारा दी गई है। भाषा-शिक्षणका प्रारम्भ प्रश्नोत्तरके द्वारा ही होना चाहिये। अध्यापकोंको चाहिये कि वे अत्यन्त सरल संस्कृत भाषा में विद्यार्थियोंसे परिचित विषयोंपर वार्तालाप करें और उनसे ऐसे प्रश्न करें जिनका वे सरलता से उत्तर दे सकें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चौथी बात यह है कि शिक्षा वास्तविक होनी चाहिये, बनावटी नहीं। प्रारम्भिक अवस्था में अप्रस्तुत विषय तथा भाव नहीं देने चाहिएँ। पाठ्य-सामग्री केवल प्रस्तुत अर्थात् प्रत्यक्ष विषयोंपर ही अवलम्बित हो।

प्रत्येक पाठमें वर्ण्य विषयोंके चित्र भी दिये गये हैं। पाठके अन्तमें कुछ प्रश्न दिये गये हैं जिनका उत्तर विद्यार्थीगण पाठकी सहायतासे दे सकते हैं। प्रश्नोंका उत्तर सदा पूर्ण वाक्योंमें ही हो। विद्यार्थियों को बिना समझे-बूझे उत्तर रटनेकी चेष्टासे बचनेके लिए प्रश्न इस ढङ्गसे रखे गये हैं कि विद्यार्थियों को उत्तर देनेसे पहले कुछ सोचना भी पड़े।

व्याकरणका प्रारम्भिक ज्ञान देनेके लिए संज्ञाओंके शब्द-रूप तथा क्रियाओंके धातु-रूप दिये गये हैं जिनका प्रयोग पाठके अन्तमें अनुवादके लिए दिए हुए वाक्योंमें पूरा हो जाता है। सन्धिनियमोंकी झंझट बचानेके लिए इस प्रारम्भिक पुस्तिकामें शब्दोंकी सन्धि नहीं की गई है।

यह भी आवश्यक समझा गया कि पाठोंमें हमारे ग्रामजीवन-का परिचय मिले और स्वदेशप्रेमकी भावना उन्नत और पुष्ट हो। इन सब पुष्टियोंसे यह विश्वास है कि यह पुस्तक संस्कृत सीखने-वालोंको सरलतासे संस्कृत-भाषाके क्षेत्रमें प्रविष्ट कर सकेगी और यह भी सिद्ध कर सकेगी कि संस्कृत अत्यन्त सरल भाषा है।

—लेखक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठन-विधि

१. संस्कृत पढ़ाते समय अध्यापक अत्यन्त सरलतासे केवल चित्रोंके सहारे ही बिना हिन्दीमें अर्थ बताये शब्दोंका बोध करा सकते हैं और जब एक संज्ञा पढ़ावें और चित्र दिखलावें तो उस शब्दकी कक्षा-द्वारा पृथक् पृथक् छात्रों से कई बार सस्वर आवृत्ति करा लें।

२. उच्चारणका सदा पूर्ण ध्यान रखना चाहिये।

३. छात्रोंसे वाक्य बनवानेके लिये अध्यापक स्वयं कार्य करके अथवा अङ्ग संचालन करके विद्यार्थियोंसे उसके विषयमें प्रश्न करें और वे उसका उत्तर दें।

४. संस्कृत पढ़ाते समय सब आदेश संस्कृतमें दिए जायँ। जैसे—उत्तिष्ठ, उपविशतु, गच्छ, आगच्छ इत्यादि। इससे नैसर्गिक रूपसे छात्रोंका शब्द-भण्डार बढ़ता है।

५. छात्रोंसे पूर्ण वाक्यमें ही उत्तर लेने चाहिएँ।

६. जहाँ संस्कृतके द्वारा अर्थ समझानेमें कठिनता हो वहाँ नागरी भाषाका पूर्ण उपयोग करना चाहिये।

७. अध्यापकको चाहिये कि पाठको रोचक और सरस बनानेके लिए अत्यन्त मृदुता और उचित प्रभावके साथ प्रश्न करे। कोई प्रश्न ऐसा न हो जिसका उत्तर देना छात्रोंकी शक्तिसे परे हो।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. यदि कोई अशुद्ध उत्तर देता हो तो उसे दूसरे छात्रों द्वारा शुद्ध कराकर उससे दोहरवाना चाहिये और फिर सम्पूर्ण कक्षा द्वारा उसकी सम्मिलित आवृत्ति करानी चाहिये।

९. विद्यार्थियोंको पढ़े हुए रूप विस्मृत न हों इसलिए आवश्यक है कि पढ़े हुए रूपोंकी समय समयपर आवृत्ति होती रहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूचिका

			पृष्ठाङ्कः
प्रथमः पाठः			
प्रश्नोत्तराणि	...	...	१
द्वितीयः पाठः			
प्रश्नोत्तराणि	...	...	९
तृतीयः पाठः			
रामः	...	...	१३
चतुर्थः पाठः			
ग्रामः	...	...	१५
पञ्चमः पाठः			
गृहम्	...	...	१८
षष्ठः पाठः			
देवालयः	...	...	२०
सप्तमः पाठः			
भोजनालयः	...	...	२३
अष्टमः पाठः			
क्षेत्रम्	...	...	
नवमः पाठः			
पाठशाला	...	...	२८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठाङ्काः

दशमः पाठः

खेलनम् ३१

एकादशः पाठः

षट् ऋतवः ३४

द्वादशः पाठः

सिंहमूषकयोः कथा ३६

त्रयोदशः पाठः

गृध्रमार्जारयोः कथा ३८

चतुर्दशः पाठः

कृतघ्नो वृकः ४१

पञ्चदशः पाठः

बाष्पयानेन यात्रा ४४

षोडशः पाठः

भारतवर्षम् ४७

सप्तदशः पाठः

कुरुक्षेत्रम् ५०

अष्टादशः पाठः

संख्यावाचकाः शब्दाः ५३

एकोनविंशः पाठः

ईशस्तुतिः ५५

व्याकरणम् ५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमः पाठः

अयं कः अस्ति ?

अयं पुरुषः अस्ति ।

अयं मनुष्यः अस्ति ।

अयं नरः अस्ति ।

पुरुषः

मनुष्यः

नरः

अयं कः ?

अयं बालकः अस्ति ।

अयं बालः अस्ति ।

बालकः

बालः

अयं कः ?

अयं कलमः

इयं का अस्तिः ?

इयं बालिका अस्ति ।

बालिका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं का अस्ति ?

इयं नौका अस्ति



नौका

इदं किं अस्ति ?

इदं पुस्तकं अस्ति

पुस्तकम्

इदं किम् ?

इदं मसीपात्रम्

मसीपात्रम्

इमौ कौ स्तः ?

इमौ हस्तौ स्तः

इमौ करौ स्तः

एकः हस्तः

एकः करः

द्वौ हस्तौ

द्वौ करौ

इमौ कौ स्तः ?

इमौ मूषकौ स्तः

एकः मूषकः

द्वौ मूषकौ

इमौ कौ स्तः ?

इमौ पुरुषौ स्तः

इमौ नरौ स्तः

इमौ मनुष्यौ स्तः

एकः पुरुषः

द्वौ पुरुषौ

द्वौ नरौ

द्वौ मनुष्यौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमौ कौ स्तः — एकः

इमौ पर्यङ्कौ स्तः — पर्यङ्कः

इमौ पल्यङ्कौ स्तः — पल्यङ्कः

द्वौ पर्यङ्कौ

पल्यङ्कौ





इमौ कौ स्तः ? — एकः कलशः

इमौ घटौ स्तः — एकः घटः

द्वौ घटौ

इमौ कलशौ स्तः — द्वौ कलशौ

इ के स्तः ? — एका घटिका

इमे घटिके स्तः — द्वे घटिके

इमे के स्तः ? — एका चटका

इमे चटके स्तः — द्वे चटके

इमे के स्तः — एकं पात्रम्

इमे पात्रे स्तः — द्वे पात्रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमे के स्तः

इमे व्यजने स्तः



एकं व्यजनम्

द्वे व्यजने

इमे के सन्ति ?

इमे मनुष्याः सन्ति

इमे नराः सन्ति

इमे पुरुषाः सन्ति

एकः मनुष्यः, नरः, पुरुषः

द्वौ मनुष्यौ, नरौ, पुरुषौ

त्रयः मनुष्याः, नराः, पुरुषाः

इमाः काः सन्ति ?



इमाः घटिकाः सन्ति

एका घटिका

द्वे घटिके

तिस्रः घटिकाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमानि कानि सन्ति ?
इमानि पुष्पाणि सन्ति
इमानि कुसुमानि सन्ति

एकं पुष्पम्, कुसुमम्
द्वे पुष्पे, कुसुमे
त्रीणि पुष्पाणि, कुसुमानि

इमे काः सन्ति ?
इमे कन्दुकाः सन्ति



अयं एकः कन्दुकः अस्ति
इमौ द्वौ कन्दुकौ स्तः
इमे त्रयः कन्दुकाः सन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



इमे बहवः मनुष्याः सन्ति, बहवः पुरुषाः इमे सन्ति ।

इमे बहवः वृक्षाः सन्ति



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



इमानि बहूनि यानानि सन्ति

अयं	इदं	इयं	—	अस्ति
इमौ	इमे	इमे	—	स्तः
इमे	इमानि	इमाः	—	सन्ति

अयं (कः)	इमौ (कौ)	इमे (के)
(एकः) पुरुषः	(द्वौ) पुरुषौ	(त्रयः)पुरुषाः(बहवः)
मनुष्यः	मनुष्यौ	मनुष्याः
नरः	नरौ	नराः
बालकः	बालकौ	बालकाः
बालः	बालौ	बालाः
हस्तः	हस्तौ	हस्ताः
करः	करौ	कराः
मूषकः	मूषकौ	मूषकाः
पर्यङ्कः	पर्यङ्कौ	पर्यङ्काः
पल्यङ्कः	पल्यङ्कौ	पल्यङ्काः
कलशः	कलशौ	कलशाः
घटः	घटौ	घटाः
कन्दुकः	कन्दुकौ	कन्दुकाः
वृक्षः	वृक्षौ	वृक्षाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्ति	स्तः	सन्ति
इदं (किं)	इमे (के)	इमानि (कानि)
(एकं) पुस्तकम्	(द्वे) पुस्तके	(त्रीणि) पुस्तकानि (बहूनि)
मसीपात्रम्	मसीपात्रे	मसीपात्राणि
पात्रम्	पात्रे	पात्राणि
व्यजनम्	व्यजने	व्यजनानि
पुष्पम्	पुष्पे	पुष्पाणि
कुसुमम्	कुसुमे	कुसुमानि
यानम्	याने	यानानि
पुस्तकम्	पुस्तके	पुस्तकानि
गृहम्	गृहे	गृहाणि
अस्ति	स्तः	सन्ति
इयं (का)	इमे (के)	इमाः (काः)
(एका) बालिका	(द्वे) बालिके	(तिस्रः) बालिकाः
नौका	नौके	नौकाः
चटका	चटके	चटकाः
घटिका	घटिके	घटिकाः
अस्ति	स्तः	सन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयः पाठः

अयं बालकः किं करोति ?
अयं बालकः गच्छति ।
अयं बालकः चलति ।

अयं मनुष्यः किं करोति ?
अयं मनुष्यः गच्छति ।
अयं नरः चलति ।

इमौ वृषभौ किं कुरुतः ?

इमौ वृषभौ चलतः ।

अयं मनुष्यः किं करोति ?

अयं मनुष्यः धावति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं पुरुषः किं करोति ?

अयं पुरुषः लिखति ।

अयं घोटकः । किं करोति ?

अयं घोटकः खादति ।
अयं अश्वः घासं खादति ।

इमे किं कुर्वन्ति ?
इमे मनुष्याः तिष्ठन्ति ।

एकः मनुष्यः तिष्ठति ।
द्वौ मनुष्यौ तिष्ठतः ।
त्रयःमनुष्याःतिष्ठन्ति।

इमे मनुष्याः किं कुर्वन्ति ?
इमे पुरुषाः उपविशन्ति ।



एकः मनुष्यः उपविशति ।
द्वौ मनुष्यौ उपविशतः ।
त्रयःमनुष्याः उपविशन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं बालिका किं करोति ?

इयं बालिका अस्ति ।

इयं बालिका खेलति ।

अयं बालकः किं करोति ?
अयं बालकः तिष्ठति ।
इदं द्वारं अस्ति ।
इमौ कपाटौ स्तः ।
इमे कपाटे स्तः ।
इदं कपाटं
अयं कपाटः
अयं काकः

अयं बालकः किं करोति ।
अयं बालकः अस्ति ।
इदं द्वारं अस्ति ।
अयं बालकः प्रविशति ।
अयं बालकः आगच्छति ।
अयं भित्तः
इयं भित्तिः



काकः भित्ते उपविशति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं बाष्पम्

अयं घटः

अयं अग्निः

इयं चुल्लिः

इदं इन्धनम्

अग्निः ज्वलति ।

इन्धनं ज्वलति ।

अयं घटः अस्ति ।

बाष्पं बहिः निःसरति ।

	अयं	इमौ	इमे
	इदं	इमे	इमानि
	इयं	इमे	इमाः
किं	करोति	कुरुतः	कुर्वन्ति
	तिष्ठति	तिष्ठतः	तिष्ठन्ति
	लिखति	लिखतः	लिखन्ति
	खादति	खादतः	खादन्ति
	चलति	चलतः	चलन्ति
	गच्छति	गच्छतः	गच्छन्ति
	आगच्छति	आगच्छतः	आगच्छन्ति
	खेलति	खेलतः	खेलन्ति
	प्रविशति	प्रविशतः	प्रविशन्ति
	उपविशति	उपविशतः	उपविशन्ति
	ज्वलति	ज्वलतः	ज्वलन्ति
	निःसरति	निःसरतः	निःसरन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः पाठः

रामः



अयं रामः अस्ति। रामः ग्रामे वसति। रामः ग्रामं गच्छति। दूरे ग्रामः अस्ति। रामः श्यामस्य ग्रामात् आगच्छति। रामः पथे चलति। पथस्य वामे दक्षिणे वृक्षाः सन्ति। रामस्य दक्षिणे हस्ते दण्डः अस्ति। दण्डः रामस्य स्कन्धे अस्ति। रामस्य वामे हस्ते पिंजरः अस्ति। पिंजरे शुकः अस्ति। रामस्य संगे रामस्य पुत्रः अस्ति। रामः पुत्राय पिंजरं ददाति। पुत्रः शुकेन सह खेलति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामः दण्डः स्कंधः पथः ग्रामः पुत्रः
वृक्षः पिंजरः शुकः हस्तः संगः

प्रश्नाः—

अयं कः अस्ति ? रामः कुत्र वसति ? ग्रामः कुत्र अस्ति ? रामः कुत्र गच्छति ? रामः कस्य ग्रामात् आगच्छति ? रामः कुत्र चलति ? वृक्षाः कुत्र सन्ति ? दण्डः कुत्र अस्ति ? रामस्य स्कन्धे किं अस्ति ? रामस्य वामे हस्ते किं अस्ति ? पिंजरे किं अस्ति ? रामस्य संगे कः अस्ति ? रामः पुत्राय किं ददाति ? शुकेन सह कः खेलति ?

शब्दावली—

अयं = यह। अस्ति = है। वसति = बसता है, रहता है। दूरे = दूर पर। गच्छति = जाता है। आगच्छति = आता है। चलति = चलता है। वामे = बाएँ। दक्षिणे = दाएँ। सह = साथ। खेलति = खेलता है। कः = कौन। कुत्र = कहाँ। किं = क्या।

अभ्यास

सरल नागरी में अनुवाद करो—

अयं ग्रामः अस्ति। ग्रामे मनुष्याः वसन्ति। शुकः वृक्षे न अस्ति। दण्डः पुत्रस्य हस्ते न अस्ति। रामः न खेलति। पुत्रः ग्रामं गच्छति। पिंजरः पथे न अस्ति। वृक्षाः न चलन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थः पाठः

ग्रामः



अयं रामस्य ग्रामः । ग्रामे बहूनां मनुष्याणां आवासाः सन्ति । वामे रामस्य आवासः अस्ति । आवासे तस्य पुत्रौ वसतः । अन्येषु आवासेषु मनुष्याः वसन्ति । आवासस्य द्वारे एकः घोटकः अस्ति । तत्र एकः रथः अस्ति । रथे द्वौ वृषभौ नद्धौ स्तः । वृषभौ दोरकाभ्यां नद्धौ स्तः । रामः वृषभौ चालयति । पथे बालकाः खेलन्ति । ते कंदुकैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खेलन्ति । रामस्य पुत्रः वृषभाभ्यां घासं ददाति । रामः ग्रामेभ्यः घोटकान् आनेष्यति । वृषभयोः स्कन्धयोः युगः अस्ति । रामः पुत्रं आज्ञापयति—हे पुत्र ! बालकान् दूरं कुरु । पुत्रः बालकान् कथयति–हे बालकाः ! रथः चलति, दूरं गच्छत । रामः वृषभौ कथयति—हे वृषभौ ! अग्रे गच्छतात् ।

घोटकः	रथः	आवासः	मनुष्यः
द्वारः	कंदुकः	पणः	घासः

प्रश्नाः—

अयं कस्य ग्रामः अस्ति ? मनुष्याणां आवासः कुत्र सन्ति ? वामे किं अस्ति ? आवासे कौ वसतः ? मनुष्याः कुत्र वसन्ति ? घोटकः कुत्र अस्ति ? तत्र किं अस्ति ? रथे कौ नद्धौ स्तः ? दोरकाभ्यां कौ नद्धौ स्तः ? वृषभौ कः चालयति ? पथे के खेलन्ति ? बालकाः कैः खेलन्ति ? वृषभाभ्यां घासं कः ददाति ? रामः ग्रामेभ्यः किं आनेष्यति ? युगः कुत्र अस्ति ? रामः पुत्रं किं आज्ञापयति ? पुत्रः बालकान् किं कथयति ? रामः वृषभौ किं कथयति ?

शब्दावली—

वसन्ति = बसते हैं । दोरकाभ्यां = डोरियों से । चालयति = चलाता है । खेलन्ति = खेलते हैं । आनेष्यति = लावेगा । युगः = जुवा । तत्र = वहाँ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यास

नागरी में अनुवाद करो—

अयं रामस्य आवासः अस्ति। वामे श्यामस्य आवासः अस्ति। आवासे श्यामस्य त्रयः (तीन) पुत्राः वसन्ति। श्यामस्य द्वारे द्वौ घोटकौ स्तः। तत्र बहवः रथाः सन्ति। रथे द्वौ घोटकौ स्तः, वृषभौ दोरकाभ्यां नद्धौ न स्तः। श्यामस्य पुत्राः कंदुकैः खेलन्ति। श्यामः पुत्रान् कथयति—भो पुत्राः! पठत (पढ़ो)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पंचमः पाठः

गृहम्

नारी उलूखले मुसलेन धान्यं कुट्टति। खट्वायां विस्तरः अस्ति। तत्र शिशुः शेते। कोणे घटः अस्ति।



घटे जलं अस्ति। बालकः तत्र गत्वा जलं पिबति। नागदन्ते धौतवस्त्रं अस्ति। आलये दीपः अस्ति। पिता आज्ञापयति— हे बालिके! मम छत्रं उपानहौ च शीघ्रं आनय। अहं बहिः गच्छामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारी	उलूखलम्	मुसलम्	धान्यम्	खट्वा
विस्तरः	शिशुः	घटः	जलम्	दीपः
उपानत्	छत्रम्	नागदन्तः	आलयः	कोणः ।

प्रश्नाः—

नारी किं करोति ? खट्वायां किं अस्ति ? शिशुः किं करोति ? घटः कुत्र अस्ति ? जलं कुत्र वर्त्तते ? बालकः कुत्र गत्वा जलं पिबति ? धौतवस्त्रं कुत्र रक्षितं अस्ति ? दीपः कुत्र अस्ति ? पिता किं वदति ? सः कुत्र गच्छति ?

अभ्यास

सरल नागरी में अनुवाद करोः—

दासी कोणे घटं रक्षति (रखती है)। माता आज्ञापयति—हे बालिके ! शीघ्रं जलं आनय। पिता आज्ञापयति—हे बालक ! उलूखलस्य समीपे मम उपानहौ स्तः, तौ आनय। दासी बहिः गच्छति (जाती है)। बालिका जलं आनयति (लाती है)। माता जलं पिबति। बालकः खट्वायां उपविशति (बैठता है)। पिता धौतवस्त्रं धारयति (पहनता है)। दोरिकायां (डोरीपर) छत्रं दण्डं च स्तः। आलये पुस्तकं अस्ति। कोणे उपानहौ स्तः। भूमौ विस्तरः न अस्ति। दिने दीपः न ज्वलति। दासी धान्यं न कुट्टति।

शब्दावली—

उलूखल = ओखली। उपानत् = जूता। उपानहौ = जूतों का जोड़ा। नागदन्तः = खूँटी। आलयः = आला या ताखा।

कुट्टति = कूटती है। शेते = सोता है। गत्वा जाकर। पिबति = पीता है। धौतवस्त्रं = धोती। आनय = ले आओ। बहिः = बाहर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ठः पाठः

देवालयः

अयं नद्याः तटः। प्रभातस्य समयः अस्ति। पूर्वस्यां दिशि सूर्यः उदितः। बहवः पुरुषाः स्त्रियः च अत्र सन्ति। एकः पुरुषः दन्तधावनं करोति अन्यथा तस्य मुखात् दुर्गन्धः



आगमिष्यति। द्वितीयः हस्ताभ्यां मुखं नेत्रं नासिका च प्रक्षालयति। तस्य समीपे जलपात्रं अस्ति। तस्य पादौ जले स्तः। तृतीयः नद्यां स्नानं करोति। चतुर्थः नदीं तरति। पञ्चमः व्यायामं करोति। व्यायामेन तस्य गात्रं पुष्टं भविष्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पं० आचार्य प्रियव्रत वेद वाचस्पति स्मृति संग्रह

नद्याः तटे एकः शिवालयः अस्ति। तत्र एकः जनः सन्ध्यां आचरति। सः प्राणायामं करोति। प्राणायामेन बहवः रोगाः शाम्यन्ति। द्वितीयः जनः सप्ततारं वादयति। सर्वे कर्णाभ्यां गीतं शृण्वन्ति। पश्य, इयं नारी शिवस्य पूजनाय शिवालये गच्छति। तस्याः दक्षिणे हस्ते जलपात्रं, वामे हस्ते फुल्लपेटिका च वर्त्तते। सुदूरे बहवः जनाः स्नानाय आगताः। नद्यां एका नौका अस्ति। कैवर्त्तः दण्डाभ्यां नौकां चालयति।

सूर्यः	हस्तः	पादः	मुखं	दन्तः
नासिका	नेत्रं	कर्णाभ्यां	नदी	दन्तधावनं
शिवालयः	फुल्लपेटिका	नौका	कैवर्त्तः।	

पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय

9136

प्रश्नाः—

अयं कस्याः तटः? किं समयः वर्त्तते? सूर्य्यः कस्यां दिशि उदितः? अत्र के आगताः? एकः पुरुषः किं करोति? सः कथं दन्तधावनं करोति? द्वितीयः हस्ताभ्यां किं करोति? तस्य समीपे किं वर्त्तते? तस्य पादौ कुत्र स्तः? तृतीयः किं करोति? चतुर्थः किं करोति? पञ्चमः किं करोति? व्यायामेन किं भवति?

नद्याः तटे किं अस्ति? तत्र एकः जनः किं करोति? सः कथं प्राणायामं करोति? द्वितीयः जनः किं करोति? कर्णाभ्यां सर्वे किं शृण्वन्ति? एका नारी शिवालये कथं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छति ? तस्याः दक्षिणे हस्ते किं अस्ति ? तस्याः वामे हस्ते किं अस्ति ? सुदूरे बहवः जनाः कथं आगताः ? सुदूरे नद्यां किं अस्ति ? नौकां कः चालयति ?

शब्दावली—

प्रभातस्य—प्रातःकाल का। अत्र = यहाँ। आगताः = आए हुए हैं। दन्तधावनं = दातौन। अन्यथा = नहीं तो। आगमिष्यति = आने लगेगी। च = और। प्रक्षालयति = धोता है। पादौ = दोनों पैर। नद्यां = नदी में। तरति = तैरता है। व्यायामेन = कसरत करने से। गात्रं = गात, शरीर। आचरति = करता है। शाम्यन्ति = नष्ट होते हैं। सप्ततारं = सितार को। इयं = यह (स्त्री)। कैवर्त्तः = केवट, मल्लाह। फुल्लपेटिका = फुलडलिया।

अभ्यास

सरल नागरी में अनुवाद करो—

प्रभातस्य वेलायां सर्वे जागरिताः सन्ति। सूर्यस्य उदये बहवः पुरुषाः नद्याः तटे आगताः। एकः दन्तधावनं करोति, द्वितीयः मुखं प्रक्षालयति, तृतीयः व्यायामं करोति च। गायकः गीतं गायति। सः सप्ततारं वादयति। सः भैरवरागं गायति। एका नारी नद्यां स्नानं करोति। ब्राह्मणः संध्यां आचरति। प्राणायामेन लाभं भवति। स्त्रियः हस्ते जलपात्रं अस्ति। फुल्लपेटिकायां फुल्लानि वर्तन्ते। नद्यां कैवर्त्तः नौकां चालयति। शिवालये शिवस्य मूर्त्तिः विद्यते। सः रागं शृणोति। सर्वे गीतं शृण्वन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमः पाठः

भोजनालयः

अत्र भोजनालयः अस्ति। चुल्ल्यां अग्निः इन्धनेन ज्वलति। धूमः गवाक्षात् बहिः निःसरति। तत्र पाचकः



परिश्रमेण भोज्यानि पचति। चुल्लेः उपरि कटाहः वर्त्तते। तस्मिन् घृतं विद्यते। पाचकः कटाहे पूरिकान् पचति। महानसे त्रीणि पीठानि सज्जीकृतानि। तेषां अग्रे त्रीणि स्थालानि सन्ति। स्थालानां समीपे त्रीणि जलपात्राणि सन्ति। स्थालेषु द्वे द्वे पूरिके द्वौ द्वौ मोदकौ च स्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकस्मिन् पात्रे दध्ना लवणेन मिश्रं आलुकस्य शाकं वर्त्तते। भित्ते काष्ठाधारः अस्ति। तस्य उपरि भाण्डानि सन्ति। बहिः एकः कूपः अस्ति। तत्र एका नारी जलं कर्षति। तस्याः पार्श्वे द्वौ घटौ स्तः। सा अत्र जलं आनेष्यति। यदा ब्रह्मणः भोजनाय आगमिष्यन्ति तदा सा जलं दास्यति।

चुल्लिः धूमः गवाक्षः अग्निः इन्धनं पाचकः महानसं
पीठं पूरिका शाकं स्थालं कटाहः आलुकं भित्तं।

प्रश्नाः—

पाचकः कुत्र तिष्ठति ? चुल्ल्यां किं प्रज्वलति ? अग्निः कथं ज्वलति ? गवाक्षात् बहिः किं निःसरति ? पाचकः किं करोति ? चुल्लेः उपरि किं वर्त्तते ? कटाहे किं अस्ति ? पाचकः कटाहे किं पचति ? पीठानि कुत्र सज्जीकृतानि सन्ति ? तेषां अग्रे कानि सन्ति ? स्थालेषु किं किं वर्त्तते ? स्थालानां समीपे कि अस्ति ? बहिः किं अस्ति ? तत्र नारी किं करोति ? तस्याः पार्श्वे कि अस्ति ? कूपात् सा किं आनेष्यति ? सा कस्मै जलं कदा दास्यति ?

सरल नागरी में अनुवाद करो—

भोजनालये पाचकः शाकं पचति। स्थालेषु (थालों में) जलपात्राणि सन्ति। शाके लवणं न विद्यते। कटाहे तप्तं घृतं विद्यते। चुल्ल्यां अग्निः ज्वलति। धूमः बहिः न निःसरति। भोजनालये धूमः अस्ति। पीठेषु मनुष्याः न सन्ति। जलपात्रेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलं न विद्यते। आलुकस्य शाकं सुस्वादुः वर्त्तते। भित्ते नागदन्तः न अस्ति किन्तु काष्ठाधारः अस्ति तस्य उपरि दधिपात्रं वर्त्तते। कूपस्य समीपे एका नारी अस्ति। सा जलं न कर्षति। ब्राह्मणाः शीघ्रं भोजनार्थं आगमिष्यन्ति। नारी जलं आनेष्यति।

शब्दावली—

बहिः = बाहर। निःसरति = निकलता है। भोज्यानि = भोजन के पदार्थों को। पचति = पकाता है। विद्यते = है। सज्जीकृतानि = सजाए हुए। जलपात्राणि = जल पीने के बर्त्तन। मोदकौ = दो लड्डू। दध्ना लवणेन मिश्रं = दही और नमक मिला हुआ। भाण्डानि = बहुत से बर्तन। कर्षति = खींचती है। आगमिष्यन्ति = आवेंगे। दास्यति = देगी, देगा। आनेष्यति = लावेगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमः पाठः

क्षेत्रम्

इदं रामस्य क्षेत्रं अस्ति । अयं रामस्य हस्ती अस्ति । सः गजः शुण्डेन वृक्षस्य शाखां त्रोटयति । सः करी



पत्राणि खादति । रामस्य वृषभौ हलं कर्षतः । वृषभयोः स्कन्धयोः एकः युगः अस्ति । वृषभौ नद्धौ स्तः । क्षेत्रे बिडालः धावति, बिडालस्य पश्चात् कुक्कुरः धावति । बिडालः भयात् रामस्य क्षेत्रं प्रविशति । दूरे वनं अस्ति । वने बहवः वृक्षाः सन्ति । एकस्य तरोः शाखायां बहवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षिणः निवसन्ति। अन्यस्य वृक्षस्य उपरि एकः वानरः उपविशति। वृक्षे फलानि सन्ति। मर्कटः एकं फलं भक्षति। दूरे रामस्य गौः एका महिषी च घासं चरतः।

क्षेत्रं घासः कुक्कुरः फलं हलं तरुः
महिषी हस्ती बिडालः वनं शाखा शुण्डः पत्रम्

प्रश्नाः—

अयं कस्य हस्ती अस्ति? सः शुण्डेन किं त्रोटयति? सः किं खादति? रामस्य वृषभौ किं कुर्वतः? युगः कुत्र अस्ति? कौ नद्धौ स्तः? बिडालस्य पश्चात् कः धावति? बिडालः भयेन कुत्र प्रविशति? बहवः वृक्षाः कुत्र सन्ति? पक्षिणः कुत्र निवसन्ति? वानरः किं भक्षति? दूरे के घासं चरन्ति।

सरल नागरी में अनुवाद करो—

बहवः पशवः निवसन्ति। वृक्षस्य उपरि पक्षिणः सन्ति। हस्ती शुण्डेन वृक्षं भनक्ति (तोड़ता है)। एकः वृषभः हलं न कर्षति। द्वौ वृषभौ हलं कर्षतः। वृषभः घासं खादति। कुक्कुरः धावति (दौड़ता है)। पक्षी फलं भक्षति। गावः वने चरन्ति। हस्ती पत्राणि भक्षति। बिडालः क्षेत्रं प्रविशति। वृषभयोः स्कन्धयोः हलं न अस्ति, युगः अस्ति। वानरः घासं न खादति। कुक्कुरः क्षेत्रस्य रक्षां करोति। महिष्यः (भैंसें) घासं चरन्ति।

शब्दावली—

भक्षति = खाता है। चरन्ति = चरती हैं। युगः = जुवा। नद्धौ = नंधे हुए। क्षेत्रे = खेत में। त्रोटयति = तोड़ता है। तिष्ठति = रहता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवमः पाठः

पाठशाला

इयं पाठशाला। उच्च आसने अध्यापकः तिष्ठति। तस्य शिरसि उष्णीषः विद्यते। तस्य वामे स्कन्धे उत्तरीयः



शोभते। तस्य दक्षिणे हस्ते पुस्तकं अस्ति। तस्य वामः हस्तः उपधानस्य उपरि वर्त्तते। छात्राः भूमौ उपविशन्ति। भित्ते स्वदेशस्य मानचित्रं अस्ति। अध्यापकस्य पार्श्वे श्यामपट्टः अस्ति। श्यामपट्टस्य शिरसि प्रोञ्छनवस्त्रं अस्ति। श्यामपट्टः सम्यक् प्रक्षालितः अस्ति। तत्र स्पष्टानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षराणि भवन्ति। श्यामपट्टस्य अग्रे खटिका अस्ति। अयं संस्कृतस्य पाठनकालः। अध्यापकः पाठयति। एकः छात्रः उत्थाय पठति। सर्वे छात्राः शान्ताः सन्ति। ते अध्यापकस्य आज्ञां अनुसरन्ति। ते श्रेष्ठाः छात्राः सन्ति। पाठस्य अनन्तरं सर्वे स्वगृहान् गमिष्यन्ति। रविवारे पाठशालायाः अनध्यायः भवति।

आसनं उष्णीषः उत्तरीयः उपधानं
श्यामपट्टः मानचित्रं प्रोञ्छनवस्त्रं खटिकाः अनध्यायः।

प्रश्नाः--

अध्यापकः कुत्र तिष्ठति? तस्य शिरसि किं अस्ति? तस्य वामः हस्तः कुत्र अस्ति? प्रोञ्छनवस्त्रं कुत्र वर्त्तते? खटिका कुत्र अस्ति? किं सम्यक् प्रक्षालितं अस्ति? कुत्र स्पष्टानि अक्षराणि भवन्ति? अयं कस्य विषयस्य पाठनकालः? अध्यापकः किं करोति? कः उत्थाय पठति? के शान्ताः सन्ति? ते कथं शान्ताः सन्ति? के श्रेष्ठाः छात्राः भवन्ति? पाठस्य अनन्तरं ते किं करिष्यन्ति?

शब्दावली--

विद्यते = है। शोभते = शोभा दे रही है, शोभित हो रही है। वर्त्तते = है। मानचित्रं = नक्शा। प्रक्षालितः = साफ किया हुआ, धोया हुआ। उत्थाय = उठकर। अनुसरन्ति = अनुसार करते हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यास

सरल नागरी में अनुवाद करो--

पाठशालायां अध्यापकः पाठयति। सः दक्षिणे हस्ते पुस्तकं गृह्णाति। चत्वारः छात्राः भूमौ स्थित्वा (बैठकर) पुस्तकानि पठन्ति। एकः बालकः उत्थाय (उठकर) पुस्तकं पठति। श्यामपट्टे किंचित् लिखितं अस्ति। अध्यापकः श्यामपट्टे खटिकया (खड़िया से) लिखति। प्रोञ्छनवस्त्रं तत्र विद्यते। अध्यापकस्य स्कन्धे उत्तरीयः विद्यते। सः उपधानस्य पार्श्वे उपविशति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमः पाठः

खेलनम्

संध्याकालः सम्प्राप्तः। संध्याकाले सर्वे बालकाः गृहात् बहिः निःसरन्ति। केचित् बालकाः नद्याः तीरे, क्षेत्रे,



वृक्षाणां वा तले खेलन्ति। पश्य एकः बालकः धावति। द्वौ बालकौ बालुकायां स्वपतः। एकः बालकः वृक्षस्य मूले उपविशति। अन्यः बालकः शिलायाः खण्डे स्थित्वा वेणुं वादयति। इमे सर्वे सूर्य्यस्य अस्तसमये गृहं गमिष्यन्ति।

इदं खेलनस्य क्षेत्रम्। इमे कुमाराः प्रभाते पाठशालायां अपठन्। पाठस्य अनन्तरं संध्यायां ते सर्वे पादकन्दुकस्य खेलनाय आगच्छन्। अधुना ते सर्वे पादकन्दुकं खेलन्ति। सर्वे पादानां प्रहारेण पादकन्दुकं इतः ततः क्षिपन्ति। कः अपि कन्दुकं हस्ताभ्यां न स्पृशति। अस्मिन् खेलने द्वे दले भवतः। द्वयोः दलयोः एकादश एकादश खेलकाः भवन्ति। दले परस्परं जेतुं यततः। पाद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कन्दुके वायुः भरितः भवति । खेलनस्य अनन्तरं कदा अपि जलं हिमं वा न ग्रहीतव्यम् । तत् अत्यन्तं हानिकरं भवति ।



इदं अपि खेलनस्य क्षेत्रं अस्ति । अत्र बहवः कुमाराः यष्टिकैः कन्दुकं खेलन्ति । यदा ते यष्टिकैः कन्दुकं ताडयन्ति तदा कन्दुकः क्षेत्रे इतः ततः ताडितः भ्रमति । यदा कन्दुकः कस्यचित् दलस्य स्तम्भयोः मध्ये प्रविशति तदा तस्य दलस्य पराजयः भवति । अस्मिन् खेलने अपि द्वे दले भवतः । यष्टिककन्दुकः लघुतरः चर्मणा निर्मितः च भवति । पादकन्दुकः यष्टिककन्दुकः च विदेशीये खेलने स्तः ।

खेलनं बालुका मूलं वेणुः पादकंदुकः दलं यष्टिकः पराजयः चर्म हिमम् भरितः ।

प्रश्नाः—

कः कालः सम्प्राप्तः ? संध्याकाले बालकाः किं कुर्वन्ति ? बालकाः कुत्र खेलन्ति ? कः धावति ? बालकौ कुत्र स्वपतः ? एकः बालकः कुत्र उपविशति ? कः वेणुं वादयति ? ते कदा गृहं गमिष्यन्ति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीये चित्रे किं पश्यसि ? कुमाराः प्रभाते कुत्र आसन् ? ते कदा अत्र आगच्छन् ? कथं ते अत्र आगच्छन् ? ते सर्वे किं कुर्वन्ति ? केन प्रकारेण ते पादकन्दुकं क्षिपन्ति ? ते हस्ताभ्यां कन्दुकं कथं न स्पृशन्ति ? अस्मिन् खेलने कति दलानि भवन्ति ? एकस्मिन् दले कति खेलकाः भवन्ति ? दले किं यततः ? पादकन्दुके किं भरितं भवति ? खेलस्य अनन्तरं किं किं न ग्रहीतव्यम् ?

शब्दावली—

सम्प्राप्तः = प्राप्त हुआ है। निःसरति = निकलता है। तले = नीचे। पश्य = देखो। स्वपतः = दो सोते हैं। उपविशति = बैठता है। पादानां = पैरोंके। पादकन्दुकं = फुटबाल। इतः = इधर। ततः = उधर। क्षिपन्ति = फेंकते हैं। स्पृशन्ति = छूते हैं। खेलकाः = खिलाड़ी। जेतुं = जीतनेका। यततः = यत्न करते हैं। यष्टिका = स्टिक, हौकी।

अभ्यास

सरल नागरी में अनुवाद करो—

सन्ध्याकाले सर्वे बालकाः खेलनाय (खेलने के लिये) नद्याः तीरे गच्छन्ति। कश्चित् (कोई) बालकः धावति। कश्चित् बालुकायां स्वपिति। कश्चित् वृक्षस्य मूले स्थित्वा वंशीं वादयति। यदा सूर्यस्य अस्तं भवति तदा ते गृहं गच्छन्ति। स्वदेशीयखेलनेषु व्ययः न भवति। कबड्डिकायां प्राणायामः व्यायामः च भवति। खेलनस्य अनन्तरं यः जलं पिबति वा हिमं खादति तस्य बहवः रोगाः भवन्ति। खेलनस्य अनन्तरं दुग्धस्य पानं स्वास्थ्ये वृद्धिं करोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकादशः पाठः

षड् ऋतवः

वसन्तः प्रादुर्भवति। वृक्षाः कुसुमिताः भवन्ति। कोकिलः कूजति। भ्रमराः भ्रमन्ति गुञ्जन्ति च। मधुपाः मधु पिबन्ति। उपवनानि शोभन्ते। जनः मोदते एवं चैत्र-वैशाखौ व्यतीतौ।

अथ ग्रीष्मः प्रादुर्भवति। सूर्यः भृशं तपति। जलं शुष्यति। दिनानि वर्धन्ते। जनः म्लायति। ज्येष्ठाषाढौ व्यतीतौ।

अथ वर्षाकालः प्रादुर्भवति। मेघाः दृश्यन्ते। देवः वर्षति। पर्वताः शीतलाः भवन्ति। नद्यां अपः वर्धते। पूर्वानिलः वहति। भूमिः श्यामायते। कृषकाः मोदन्ते। श्रावणः भाद्रपदः च गच्छतः।

अथ शरत्कालः प्रादुर्भवति। आकाशं निर्मलं जायते। मेघाः अपगच्छन्ति। चन्द्रः सम्यक् प्रकाशते। मार्गाः कर्दमरहिताः भवन्ति। एवं आश्विनकार्त्तिकौ व्यतीतौ।

अथ हेमन्तः प्रादुर्भवति। दिवसाः हसन्ति। रात्रिः वर्धते। सूर्यः मन्दं तपति। हिमं पतति। सलिलं शीतलतरं भवति। शीतलः पवनः वाति। एवं मार्गशीर्षपौषौ गच्छतः।

अथ शिशिरः प्रादुर्भवति। दिनानि वर्धन्ते। वृक्षात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्णानि पतन्ति। सस्यानि पच्यन्ते। एवं माघफाल्गुनौ अपि विगतौ।

प्रश्नाः—

कतीनां मासानां एकः ऋतुः भवति ? श्रावणो भाद्रपदश्च कं ऋतुं कुरुतः ? हेमन्ते किं किं भवति ? तस्मिन् ऋतौ सूर्यः कथं न तपति कथं च ग्रीष्मे ? त्वं ग्रीष्मे कीदृशं जलं वाञ्छसि ? हेमन्ते कूपात् कीदृशं जलं निःसरति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वादशः पाठः

सिंहमूषकयोः कथा

कस्मिंश्चिद् वने एकः शार्दूलः अवसत् । सः पर्वतस्य गुहायां दिवा स्वपनं अकरोत् रात्रौ च पशून् व्यापाद्य अभक्षयत् । एकदा पूर्णं आहारं कृत्वा सः एकस्य वृक्षस्य छायायां अस्वपत् । तत्र बहवः मूषकाः बिलात् निर्गत्य सानन्दं सिंहस्य शरीरस्य उपरि अधावन् । तस्मात् प्रबुद्धः शार्दूलः मूषकेभ्यः अतीव अक्रुध्यत् । मूषकाः अपि तं प्रबुद्धं दृष्ट्वा पलायन्त । किन्तु संरुष्टः सिंहः यदा तेषां एकं अगृह्णात् तदा सः वराकः आर्त्तेन स्वरेण अवदत्—'भोः महाराज ! अयि वीरप्रवर ! मयि दयां कुरु । यथाशक्तिः तव साहाय्यं करिष्यामि ।'

विगते किञ्चित् काले एकः व्याधः तस्य एव वृक्षस्य तले जालं प्रासारयत् । तस्मिन् जाले सः सिंहः अपतत् । स्वं एवं बद्धं दृष्ट्वा सः उच्चैः स्वरेण अगर्जत् । तत् नर्दनं श्रुत्वा मूषकः सत्वरं शार्दूलस्य समीपं गत्वा अवदत्—'भोः महाराज ! अलं अधुना भयेन । एषः अहं तव दासः समुपस्थितः इति कथयित्वा तत् जालं शीघ्रं अकृन्तत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नाः—

शार्दूलः कुत्र न्यवसत् ? सः दिवा किं अकरोत् ? रात्रौ च किं अकरोत् ? मूषकाः किं अकुर्वन् ? शार्दूलः केभ्यः अक्रुध्यत् ? शार्दूलेन गृहीतः मूषकः किं अवदत् ? सिंहस्य नर्दनं श्रुत्वा मूषकः किं अकरोत् !

शब्दावली—

9136

अरण्यम् = जङ्गल । निर्गत्य = निकल कर । शार्दूलः = सिंह । वराकः = बेचारा । दिवा = दिन में । सत्वरम् = झटिति, शीघ्र । स्वपन् = सोता हुआ । व्यापाद्य = मार कर । प्रासारयत् = फैलाया । अधुना = इदानीम्, अब । कृत्वा = करके । नर्दनं = गरजना । अकृन्तत् = काट डाला ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रयोदशः पाठः

गृध्रमार्जारयोः कथा

भागीरथ्याः तीरे एकः पर्कटीवृक्षः आसीत्। तस्य कोटरे जरद्गवो नामकः वृद्धः नेत्रहीनः गृध्रः अवसत्। अन्ये च बहवः पक्षिणः तस्मिन् वृक्षे नीडेषु अवसन्। ते कृपया जरद्गवाय भोजनम् अयच्छन्। सः अपि दिवा पक्षिशावकान् अरक्षत्। एकदा दीर्घकर्णः नामकः मार्जारः खगानां शावकान् भक्षयितुं आगच्छत्। तं दृष्ट्वा विहगानां शावकाः कोलाहलं अकुर्वन्। एतं कलरवं श्रुत्वा जरद्गवः अवदत्—कः अत्र अस्ति ?

मार्जारः जरद्गवं दृष्ट्वा सभयं अवदत्—'आर्य ! नमस्ते। विडालः अहम्'।

इति श्रुत्वा जरद्गवः कठोरेण स्वरेण अवदत्—'झटिति दूरं गच्छ। तव अत्र प्रयोजनं न अस्ति।'

ततः सः मार्जारः अवदत्—'अहम् अत्र गङ्गायाः तीरे व्रतं आचरामि। त्वं धर्मनिष्ठः इति श्रुत्वा अहं धर्मं श्रोतुं आगच्छम्।'

एवं विश्वासं दत्वा जरद्गवस्य समीपे अतिष्ठत्। सः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिदिनं विहङ्गमशावकान् तस्य कोटरं आनीय अखादत् ।
अनेन प्रकारेण सः बिडालः सर्वान् पक्षिशावकान् भक्षयित्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पलायनं अकरोत् । तदा खगाः जरद्गवस्य कोटरे शावकानां अस्थीनि अपश्यन् । ततः एषः एव अस्माकं शावकान् अखादत्–इति तर्कयित्वा ते गृध्रं अहनन् ।

शब्दावली—

शावकः = बच्चा । श्रुत्वा = सुनकर । नीडः = घोंसला । मार्जारः = बिलाव । भक्षयितुम् = खाने के लिए । श्रोतुम् = सुननेके लिए । दृष्ट्वा = देखकर । खगः, विहगः, विहङ्गमः = पक्षी । आचरामि = करता हूँ । आनीय = लाकर । अस्थि = हड्डी । तर्कयित्वा = समझकर । अहनन् = मार डाला ।

प्रश्नाः—

पर्कटीवृक्षः कुत्र आसीत् ? जरद्गवः कीदृशः आसीत् ? सः कुत्र अवसत् ? सः किं अकरोत् ? दीर्घकर्णः कोटरे कथं आगच्छत् ? सः किम् अकरोत् ? कोटरे शावकानां अस्थीनि दृष्ट्वा खगाः किं प्रतर्कयन् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्दशः पाठः

कृतघ्नो वृकः

एकदा कश्चित् वृकः कश्चित् छागं चोरयित्वा सत्वरं तस्य भक्षणे तत्परः आसीत् । कश्चिद् गोमायुः तत्र आगत्य तं अकथयत्–'कथं एनं खादसि एतया त्वरया । यदि एवं भक्षयिष्यसि तर्हि तव पाचनस्य शक्तिः मन्दा भविष्यति ।' किन्तु वृकः दुर्विनीततया अवदत्–'न एषः तव व्यापारः । अहं स्वं हितं सम्यक् जानामि । कथं निरर्थकं जल्पसि ?' एतत् श्रुत्वा गोमायुः तूष्णीं अभवत् । सः तस्मात् स्थानात् प्रतिनिवृत्य किञ्चित् दूरं गत्वा अतिष्ठत् ।

अथ क्षिप्रं भक्षणात् एकं अस्थि वृकस्य कण्ठे तिर्यक् भूत्वा संलग्नं अभवत् । तेन छागं खादितुं असमर्थः सः तीव्रां पीडां प्राप्नोत् । एवं व्यथितः सः गोमायुं आहूय अन्वनयत्– 'महाभाग ! प्रचण्डा मे व्याधिः । यदि मम साहाय्यं न करिष्यसि तर्हि मां मृतं एव जानीहि । तेन हि क्षिप्रं आनय कञ्चित् चिकित्सकम्' । एतत् श्रुत्वा गोमायुः आर्द्रचित्तः अभवत् । सः शीघ्रं एकं सारसं आनयत् । एषः सारसः पशुषु विख्यातः प्रवीणः शस्त्रवैद्यः आसीत् । सः वृकस्य समीपं गत्वा तस्य विवृतं आननं चिरं अवलोकयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तत्पश्चात् स्व-चञ्चुपुटं तस्य कण्ठे प्रवेश्य अस्थि च झटिति निस्सार्य्य 'सप्तदिवसान् शाकजूषमेव खाद' इति वृकं आदिश्य स्वं गृहं अगच्छत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विगतेषु सप्तदिवसेषु सारसः स्वं शुल्कं प्राप्तुं वृकं प्रति अगच्छत् । किन्तु यदा सः स्वं शुल्कं अयाचत तदा कुपितः वृकः अकथयत्—अयि कृतघ्न ! यदा त्वं स्वां लम्बग्रीवां मम कण्ठप्रदेशे प्रावेशयः तदा तव ग्रीवा मम दन्तानाम् मध्ये आसीत् । तस्मिन् समये अहं त्वां न अभक्षयम् । किं एषः ते पर्य्याप्तः शुल्कः न अस्ति ?'

तत् श्रुत्वा सारसः खिन्नेन चित्तेन गोमायोः समीपं गत्वा सर्वं वृत्तान्तं अकथयत् । कृतघ्नानां खलु एषा एव परिपाटी इति गोमायुः स्वं मित्रं समाश्वासयत् ।

वृकः = भेड़िया । अन्वनयत् = विनय की । त्वरा = शीघ्रता । विवृतः = फैला हुआ । तूष्णीम् = चुप । निस्सार्य = निकालकर । प्रतिनिवृत्य = वापस आकर । आदिश्य = आदेश देकर । तिर्यक् = तिरछी । शुल्कः = फीस ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चदशः पाठः

बाष्पयानेन यात्रा

अहम् अद्य रामपुरात् वाराणसीं गन्तुम् इच्छामि। अधुना द्विवादनस्य कालः। गमनात् पूर्वं शुल्कपत्रं



ग्रहीतव्यम्। मया प्राप्तं शुल्कपत्रम्। पत्रविक्रेता न वितरति इदानीम्। अस्मात् स्थानात् वाराणस्याः सार्द्धं एक रूप्यकम् शुल्कम् अस्ति। घंटायाः शब्दः बाष्पयानस्य आगमनं सूचयति। यात्रिणः सावधानाः भवन्तु। पश्य बाष्पयानं आगतम्। तस्य धूमेन आकाशं मलिनं अभवत्। पुरुषाः सेतोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपरि चलन्ति। कलानाम् विक्रेता, खेलनानाम् विक्रेता, मिष्टान्नस्य विक्रेता च अत्र आगताः। भारवाही जनः शकटस्य उपरि भारं नयति। यदा बाष्पयानं तिष्ठति तदा अहं यानस्य एकस्मिन् कोष्ठे प्रवेशं करिष्यामि। बाष्पयानं अति शीघ्रं मां वाराणसीं नेष्यति। बाष्पयानं बाष्पेन चलति। चालकः अञ्जनं चालयति।

शुल्कपत्रम्	पत्रविक्रेता	शुल्कम्		बाष्पयानम्
घंटा	रूप्यकम्	सेतुः	खेलनम्	मिष्टान्नम्
भारवाही	शकटः	कोष्ठः	बाष्पः	चालकः	अञ्जनम्

प्रश्नः—

इदं किं स्थानं वर्त्तते? कुत्र गन्तुम् इच्छामि? अधुना किं वादनं यातम्? गमनात् पूर्वं किं कर्तव्यम्? मया किं प्राप्तम्? कः न वितरति इदानीम्? वाराणस्याः किं शुल्कम् अस्ति? घंटायाः शब्दः किं सूचयति? के सावधानाः भवन्तु? सेतोः उपरि के चलन्ति? भारवाही किं नयति? के अत्र आगताः? अहं यानस्य कोष्ठे कदा प्रवेशं करिष्यामि? बाष्पयानं मां कदा नेष्यति? बाष्पयानं कथं चलति? कः अञ्जनं चालयति?

शब्दावली—

पाद + ऊन = पाव कम अर्थात् पौने। वादनस्य = बजनेका। ग्रहीतव्यम् = ले लेना चाहिये। नेष्यति = ले जायगा, पहुँचा देगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यास

सरल नागरी में अनुवाद करो—

अधुना सार्धएकः वादनस्य कालः अस्ति। द्विवादनस्य काले बाष्पयानं आगमिष्यति । अहं प्रयागं गन्तुं इच्छामि। मया शुल्कपत्रं न प्राप्तम्। शुल्कपत्रेण विना अहं न गच्छामि। सर्वे यात्रिणः शुल्कपत्राणि गृह्णन्ति। गमनस्य पूर्वे अहं बालकानां निमित्ते मिष्टान्नं क्रीणामि। यात्रिणः सावधानाः भवन्ति। बाष्पयानं अधुना आगमिष्यति। सर्वे विक्रेतारः अत्र आगताः। श्रूयतां घण्टायाः नादम्। बाष्पयानस्य धूमः आकाशे दृश्यते। त्वं अपि मम सह प्रयागं चल।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षोडशः पाठः

भारतवर्षम्

भारतवर्षं स्वदेशः अस्ति । अस्मिन् देशे वयं जाताः । अस्य दुग्धेन जलेन वायुना अन्नेन च वयं पोषिताः । अयं सर्वेषु देशेषु श्रेष्ठतमः अस्ति ।



अत्र एव षट् ऋतवः भवन्ति । अत्र एव संसारस्य सर्व उच्चः पर्वतः हिमालयः उत्तरस्यां दिशि प्रहरी इव अस्य रक्षां करोति । अत्र एव गङ्गा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु, कावेरी आदयः पवित्राः नद्यः प्रवहन्ति । अत्र एव अयोध्या मथुरा माया काशी काञ्ची अवन्तिका आदयः प्राचीनाः पुर्यः सन्ति । अत्र एव कलिकाता पाटलिपुत्रं प्रयागः कर्णपुरं लक्ष्मणपुरं इन्द्रप्रस्थः लवपुरं नागपुरं मद्रासः मुम्बई आदीनि विशालानि नगराणि वर्त्तन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र एव नंदनकाननस्य तुल्यः काश्मीरदेशः वर्त्तन्ते। सर्वाणि धान्यानि अत्र उत्पद्यन्ते। सर्वाणि सुमधुराणि फलानि अत्र जायन्ते। सर्वप्रकारस्य शाकाः अत्र प्राप्यन्ते। अत्र सर्वाणि रत्नानि उपलब्धानि भवन्ति। संसारे प्रसिद्धः कोहनूरनामकः हीरकः अत्र एव प्राप्तः अभूत्।

अयं देशः वीराणां भूमिः। अत्र एव भगवता नारायणेन रामस्य रूपेण कृष्णस्य रूपेण च अवतारः गृहीतः। अत्र एक महाराणाप्रतापाः शिवाः च निज निज पराक्रमेण देशस्य गौरवं अवर्द्धयन्। अत्र एव सीता सावित्री पद्मिनी आदयः असंख्याः नार्य्यः पातिव्रत्येन प्रतिष्ठां अप्राप्नुवन्। अधुना अपि अनेकाः महापुरुषाः आत्मत्यागेन तपसा च स्वदेशस्य सेवायां लग्नाः सन्ति। जयतु गौरवशाली भारतदेशः। वन्दे स्वभूमिमातरम्।

गायन्ति देवाः किल गीतकानि,
धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गास्पद आदि भूते,
भवन्ति भूयः पुरुषाः सुरत्वात्॥

भारतवर्षम् अन्नं ऋतुः पर्वतः हिमालयः प्रहरी पुरी काननं रत्नं हीरकः भगवन् पराक्रमः गौरवं नारी पातिव्रत्यं प्रतिष्ठां तपः त्यागः गीतकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नाः—

कः स्वदेशः अस्ति ? वयं कुत्र जाताः ? वयं केन केन वस्तुना पोषिताः ? कः श्रेष्ठतमः देशः अस्ति ?

षट् ऋतवः कुत्र भवन्ति ? हिमालयः कुत्र अस्ति ? सः किं करोति ? अत्र काः नद्यः सन्ति ? अत्र काः प्राचीनाः पुर्यः सन्ति ? भारतस्य विशालानि नगराणि गणय ? नंदनकाननस्य तुल्यः कः देशः अस्ति ? अत्र किं किं लभ्यते ? अत्र किं नामधेयः हीरकः आसीत् ?

भारते के के वीराः संजाताः ? सीता आदि नार्यः कथं प्रतिष्ठां अप्राप्नुवन् ? अधुना के के महापुरुषाः स्वदेशस्य सेवां कुर्वन्ति ? देवाः किं गायन्ति ?

शब्दावली—

स्वदेशः = अपना देश । जाताः = पैदा हुए हैं । पोषिताः = पोसे गए हैं । षट् = छः । प्रहरी = पहरेदार । करोति = करता है । प्रवहन्ति = बहती हैं । कर्णपुरम् = कानपुर । लक्ष्मणपुरम् = लखनऊ । इन्द्रप्रस्थः = दिल्ली । लवपुरम् = लाहौर । विशालानि = बड़े-बड़े । जायन्ते = उत्पन्न होते हैं । गृहीतः = धारण किया है ।

अभ्यास

सरल नागरीमें अनुवाद करो—

भारतवर्षः अत्यन्तः विशालः देशः अस्ति । अस्मिन् सप्तलक्षाः ग्रामाः सन्ति । भारतस्य अधिकः जनवर्गः ग्रामेषु एव निवसति । तेषां प्रधाना वृत्तिः कृषिः एव विद्यते । अतः सर्वे कृषकाः एव सन्ति । पुरा षष्ठः अंशः राजस्वं आसीत् । स्वराज्ये कृषकाः सुखिनः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तदशः पाठः

कुरुक्षेत्रम्

अयं रथः कुरुक्षेत्रे तिष्ठति। अस्य रथस्य सारथिः भगवान् श्रीकृष्णः अस्ति। तेन द्वयोः सेनयोः मध्ये रथः



स्थापितः। अर्जुनः रथे तिष्ठति। रथस्य शिरसि ध्वजः वर्त्तते। ध्वजे हनुमान् चित्रितः अस्ति। अनेन एव कारणेन अर्जुनस्य कपिध्वजः इति अपि नाम अस्ति।

श्रीकृष्णः महाभारतस्य युद्धात् पूर्वं दुर्योधनस्य गृहे अगच्छत्। तत्र सः पाण्डवानाम् अर्थे पञ्च ग्रामान् अयाचत। दुर्योधनः अवदत्—हे केशव! युद्धेन विना अहं सूचि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कायाः अग्रभागस्य तुल्यां अपि भूमिं न दास्यामि। श्रीकृष्णः तत् वार्त्तां पाण्डवान् न्यवेदयत्। ततः महाभारत नामकम् युद्धम् अभूत्।

यदा अर्जुनः स्वगुरून् बान्धवान् च युद्धस्य भूमौ अपश्यत् तदा सः अत्यन्तः व्याकुलः अभूत्। तस्मिन् काले श्रीकृष्णः तस्मै उपदेशम् अददात्। तत् उपदेशः श्रीमद्भगवद्गीता इति नामके ग्रंथे सञ्चितः अस्ति। सर्वैः जनैः गीता सुगीता कर्त्तव्या। एषा अस्मिन् संसारे सर्वश्रेष्ठा पुस्तिका।

कुरुक्षेत्रम् सेना ध्वजः ग्रामः सूचिका
भूमिः उपदेशः गीता पुस्तिका।

प्रश्नाः—

रथः कुत्र तिष्ठति? कः कस्य सारथिः? तेन कयोः मध्ये रथः स्थापितः? रथे कः तिष्ठति? रथस्य शिरसि किं वर्त्तते? ध्वजे किं चित्रितम् अस्ति? अर्जुनस्य अपरं नाम किम्?

युद्धात् पूर्वं श्रीकृष्णः कुत्र अगच्छत्? स किं अयाचत्? सः कथं ग्रामान् अयाचत्? दुर्योधनः किम् अवदत्। श्रीकृष्णः तदा किम् अकरोत्? ततः किम् अभूत्?

अर्जुनः कदा व्याकुलः अभूत्? श्रीकृष्णः तदा किम् अकरोत्? श्रीकृष्णस्य उपदेशः कुत्र सञ्चिताः सन्ति? जनैः किं कर्तव्यम्? कथं गीता सुगीता कर्तव्या?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यास

सरल नागरी में अनुवाद करो—

यतः कृष्णः ततः धर्मः। यतः धर्मः ततः जयः। श्रीकृष्णः दूतरूपेण कौरवाणां समीपे अगच्छत्। दुर्य्योधनः अति अहंकारी आसीत् (था)। सः पञ्च ग्रामाः अपि पाण्डवेभ्यः न अददात् (दिया)। तस्य अहङ्कारः तस्य सर्वनाशस्य कारणम् अभवत्। यत्र योगेश्वरः कृष्णः यत्र धनुर्धरः पार्थः तत्र एव श्रीः विजयः भूतिः (ऐश्वर्य) च वसन्ति।

शब्दावली—

सारथिः—सारथी। कपिध्वजः = जिसके झण्डेपर वानर बना हुआ हो अर्थात् अर्जुन। अर्थे = लिये। अयाचत = माँगा। वार्त्ता = बात। न्यवेदयत् = कहा। संचितः = एकत्र किया हुआ अर्थात् संग्रह किया हुआ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टादशः पाठः

संख्यावाचकाः शब्दाः

१ एकः पुरुषः गच्छति । एका नारी स्वपिति । एकं पुस्तकम् अस्ति ।

एकं पुरुषं पश्य । एकां नौकां चालय । एकं पुस्तकं गृहाण ।

एकेन पुरुषेण फलं भक्षितम् । एकया नार्या घटः भरितः । एकेन मित्रेण बालकाः पाठिताः ।

एकस्मै पुरुषाय फलं देहि । एकस्यै नार्यै पुस्तकं देहि । एकस्मै पुस्तकाय वेष्टनं रचयतु ।

एकस्मात् वृक्षात् फलं पतितम् । एकस्याः लतायाः पुष्पाणि पतितानि । एकस्मात् गृहात् पुरुषः आगतः ।

एकस्य बालकस्य खेलनम् अस्ति । एकस्याः बालिकायाः वस्त्रम् अस्ति । इमानि एकस्य फलस्य बीजानि सन्ति ।

एकस्मिन् पुरुषे बहवः गुणाः सन्ति । एकस्यां नद्यां बहवः नौकाः सन्ति । एकस्मिन् वने मयूराः नृत्यन्ति ।

२ द्वौ पुरुषौ द्वे स्त्रियौ च आगताः । द्वौ वने स्तः ।

३ त्रयः बालकाः वार्त्तालापं कुर्वन्ति । तिस्रः स्त्रियः स्नानम् कुर्वन्ति । त्रीणि पुस्तकानि रक्षितानि सन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ चत्वारः बालकाः पठन्ति । चतस्रः बालिकाः गायन्ति । चत्वारि चित्राणि भित्ते सन्ति ।

५ पञ्च पशवः पञ्च बालिकाः पञ्च मित्राणि अङ्गणे सन्ति ।

६ षट् शिशवः षट् बालाः षट् फलानि गृहे सन्ति ।

७ सप्त वृक्षाः सप्त शाखाः सप्त आसनानि उपवने वर्त्तन्ते ।

८ अष्ट रथाः अष्ट देव्यः अष्ट पुष्पाणि च अत्र विद्यन्ते ।

९ नव हस्तिनः नव मालाः नव चित्राणि तत्र विद्यन्ते ।

१० दश शुकः दश लताः दश अन्नानि अत्र सन्ति । ११ एकादश, १२ द्वादश, १३ त्रयोदश, १४ चतुर्दश, १५ पञ्चदश, १६ षोडश, १७ सप्तदश, १८ अष्टादश, १९ ऊनविंशतिः, २० विंशतिः, २१ एकविंशतिः, २२ द्वाविंशतिः, २३ त्रयोविंशतिः, २४ चतुर्विंशतिः, २५ पञ्चविंशतिः, २६ षट्विंशतिः, २७ सप्तविंशतिः, २८ अष्टाविंशतिः, २९ ऊनत्रिंशत्, ३० त्रिंशत्, ३१ एकत्रिंशत्, ३२ द्वात्रिंशत्, ३३ त्रयःत्रिंशत्, ३४ चतुःत्रिंशत्, ३५ पञ्चत्रिंशत्, ३६ षट्त्रिंशत्, ३७ सप्तत्रिंशत्, ३८ अष्टात्रिंशत्, ३९ ऊनचत्वारिंशत्, ४० चत्वारिंशत्, ५० पञ्चाशत्, ६० षष्टिः, ७० सप्ततिः, ८० अशीतिः, ९० नवतिः, १०० शतम्, १००० सहस्रम्, १००००० लक्षम्, १०००००० कोटिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोनविंशः पाठः

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ॥१॥

त्वम् एव (अस्माकं) माता च त्वम् एव पिता, त्वम् एव बन्धुः च त्वम् एव सखा, त्वम् एव विद्या, त्वम् एव द्रविणं (धनं), (हे) देवानां देव ! त्वम् एव मम सर्वम् ॥ १ ॥

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥

अपना कुल छोटा ही क्यों न हो, वह यदि संगठित रहे तो बड़ा लाभ होता है जैसे धानों में से भूसी निकल जाने पर वह नहीं उगता।

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥

अतिथि जिसके घरसे निराश होकर लौटता है तो वह अपने पाप उसे देकर उसके कमाए हुए पुण्य लेकर चला जाता है।

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥

एक मात्र धर्म ही ऐसा मित्र है कि जो प्राणी के मर जानेके बाद भी उसके साथ जाता है। शेष सब तो इस शरीर के नष्ट होते ही नष्ट हो जाते हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

जो पीठ पीछे काम बिगाड़ता हो और मुँहपर मीठी-मीठी बातें करता हो, ऐसे मित्रको त्याग दें। वह तो विषसे पूर्ण किन्तु मुख पर जरा-सा दूध भरे रहनेवाले घड़ेके समान घातक होता है।

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥

विद्यासे अलंकृत भी दुर्जन मनुष्यसे दूर ही रहना चाहिए। क्या मणिसे विभूषित सर्प भयानक नहीं होता ?

पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥

नैपुण्य और सचाई बात-चीत करने से ही जानी जाती है। गाम्भीर्य तथा चंचलताका अभाव ये प्रत्यक्ष ही ज्ञात हो जाते हैं।

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
मासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥

बुद्धिमान् मनुष्य एक पैर से चलता है और दूसरे से टिकता है। इसलिये जबतक दूसरी जगह न देख ले, तबतक पुरानी जगह न छोड़े।

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥

धन नष्ट होना, मनका सन्ताप, घरेलू दोष, ठगाजाना और अपना अपमान, बुद्धिमान् मनुष्य इन बातोंको दूसरेसे न कहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दानोपभोगहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥

दान और भोगसे हीन धनसे यदि धनी हो सके तो हम भी औरोंके घर में रक्खे धनसे अपने को धनी क्यों न मान लें।

राजा च कुलभूर्विप्रा मन्त्रिणश्च पयोधराः ।
स्थानभ्रष्टा न शोभन्ते दन्ताःकेशानखानराः ॥

राजा, कुलवन्ती नारी, ब्राह्मण, मंत्री, मेघ, दाँत, केश और मनुष्य, ये अपने स्थानसे अलग होकर भले नहीं लगते !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकारान्तः पुँल्लिंगः रामशब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तयः
रामः	रामौ	रामाः	प्रथमा
रामम्	रामौ	रामान्	द्वितीया
रामेण	रामाभ्याम्	रामैः	तृतीया
रामाय	रामाभ्याम्	रामेभ्यः	चतुर्थी
रामात्, रामाद्	रामाभ्याम्	रामेभ्यः	पंचमी
रामस्य	रामयोः	रामाणाम्	षष्ठी
रामे	रामयोः	रामेषु	सप्तमी
हे राम	हे रामौ	हे रामाः	सम्बोधनम्

दकारान्तः पुँल्लिंगः 'तद्' शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तयः
सः (वह)	तौ (वे दोनों)	ते (वे सब)	प्र०
तम्	तौ	तान्	द्वि०
तेन	ताभ्याम्	तैः	तृ०
तस्मै	ताभ्याम्	तेभ्यः	च०
तस्मात्-द्	,,	,,	पं०
तस्य	तयोः	तेषाम्	ष०
तस्मिन्	,,	तेषु	स०

गम् धातु (जाना)

लट् (वर्तमानकाल)

एकवचनम्	द्विवचनम्	बहुवचनम्	पुरुषाः
गच्छति	गच्छतः	गच्छन्ति	प्रथम पुरुषः
गच्छसि	गच्छथः	गच्छथ	मध्यम पुरुषः
गच्छामि	गच्छावः	गच्छामः	उत्तम पुरुषः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लङ् (भूतकाल)

अगच्छत्	अगच्छताम्	अगच्छन्	प्र० पु०
अगच्छः	अगच्छतम्	अगच्छत	म० पु०
अगच्छम्	अगच्छाव	अगच्छाम	उ० पु०

लृट् (भविष्यत् काल)

गमिष्यति	गमिष्यतः	गमिष्यन्ति	प्र० पु०
गमिष्यसि	गमिष्यथः	गमिष्यथ	म० पु०
गमिष्यामि	गमिष्यावः	गमिष्यामः	उ० पु०

'अस्' धातु (होना)

लट् (व० का०)

एक० व०	द्वि० व०	बहु० व०	पुरुषाः
अस्ति	स्तः	सन्ति	प्र० पु०
असि	स्थः	स्थ	म० पु०
अस्मि	स्वः	स्मः	उ० पु०

लङ् (भूतकाल)

आसीत्	आस्ताम्	आसन्	प्र० पु०
आसीः	आस्तम्	आस्त	म० पु०
आसम्	आस्व	आस्म	उ० पु०

लृट् (भविष्यत् काल)

भविष्यति	भविष्यतः	भविष्यन्ति	प्र० पु०
भविष्यसि	भविष्यथः	भविष्यथ	म० पु०
भविष्यामि	भविष्यावः	भविष्यामः	उ० पु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दकारान्तः स्त्रीलिंगः 'तद्' शब्दः

एक० व०	द्वि० व०	बहु० व०	कारकाः
सा	ते	ताः	प्रथमा
ताम्	,,	,,	द्वि०
तया	ताभ्याम्	ताभिः	तृ०
तस्यै	,,	ताभ्यः	च०
तस्याः	,,	,,	पं०
,,	तयोः	तासाम्	ष०
तस्याम्	,,	तासु	स०

आकारान्तः स्त्रीलिंगः 'विद्या' शब्दः

एक व०	द्वि० व०	ब० व०	कारकाः
विद्या	विद्ये	विद्याः	प्र०
विद्याम्	,,	,,	द्वि०
विद्यया	विद्याभ्याम्	विद्याभिः	तृ०
विद्यायै	,,	विद्याभ्यः	च०
विद्यायाः	,,	विद्याभ्यः	पं०
,,	विद्ययोः	विद्यानाम्	ष०
विद्यायाम्	,,	विद्यासु	स०
हे विद्ये	हे विद्ये	हे विद्याः	सं०

इसी प्रकार खट्वाका भी रूप चलता है

अकारान्तः नपुंसकलिंगः 'ज्ञान' शब्दः

एक०	द्वि०	बहु०	कारकाः
ज्ञानम्	ज्ञाने	ज्ञानानि	प्र०
,,	,,	,,	द्वि०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः	तृ०
ज्ञानाय	,,	ज्ञानेभ्यः	च०
ज्ञानात्	,,	,,	पं०
ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्	ष०
ज्ञाने	,,	ज्ञानेषु	स०
हे ज्ञान	हे ज्ञाने	हे ज्ञानानि	सं०

ईकारान्तः स्त्रीलिंगः 'नदी' शब्दः

एक० व०	द्वि० व०	बहु० व०	विभक्तयः
नदी	नद्यौ	नद्यः	प्र०
नदीम्	,,	नदीः	द्वि०
नद्या	नदीभ्याम्	नदीभिः	तृ०
नद्यै	,,	नदीभ्यः	च०
नद्याः	,,	,,	पं०
,,	नद्योः	नदीनाम्	ष०
नद्याम्	,,	नदीषु	स०
हे नदि	हे नद्यौ	हे नद्यः	सं०

मकारान्तः पुँल्लिंगः 'अयम्' शब्दः

ए०	द्वि	वहु०	विभक्तयः
अयम्	इमौ	इमे	प्र०
इमम् , एनम्	,, एनौ	इमान्-एनान्	द्वि०
अनेन, एनेन	आभ्याम्	एभिः	तृ०
अस्मै	,,	एभ्यः	च०
अस्मात्-द्	,,	,,	पं०
अस्य	अनयोः, एनयोः	एषाम्	०
अस्मिन्	,, ,,	एषु	स०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मान्तः स्त्रीलिंगः 'इयम्' शब्दः

एक०	द्वि०	बहु०	विभक्तयः
इयम्	इमे	इमाः	प्र०
इमम्	,,	इमाः	द्वि०
अनया	आभ्याम्	आभिः	तृ०
अस्यै	,,	आभ्यः	च०
अस्याः	,,	,,	पं०
अस्याः	अनयोः	आसाम्	ष०
अस्याम्	,,	आसु	स०

मान्तः नपुंसकलिंगः 'इदम्' शब्दः

एक०	द्वि०	बहु०	विभक्तयः
इदम्	इमे	इमानि	प्र०
,, एनम्	,, एने	,, एनानि	द्वि०
अनेन	आभ्याम्	एभिः	तृ०
अस्मै	,,	एभ्यः	च०
अस्मात्	,,	,,	
अस्य	अनयोः	एषाम्	ष०
अस्मिन्	,,	एषु	स०

पठ् धातु ('लट्')

एक०	द्वि०	बहु०	पुरुषाः
पठति	पठतः	पठन्ति	प्र० पु०
पठसि	पठथः	पठथ	म० पु०
पठामि	पठावः	पठामः	उ० पु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लङ्

अपठत्	अपठताम्	अपठन्	प्र० पु०
अपठः	अपठतम्	अपठत	म० पु०
अपठम्	अपठाव	अपठाम	उ० पु०

लृट्

पठिष्यति	पठिष्यतः	पठिष्यन्ति	प्र० पु०
पठिष्यसि	पठिष्यथः	पठिष्यथ	म० पु०
पठिष्यामि	पठिष्यावः	पठिष्यामः	उ० पु०

भू धातु

9136

वर्त्तमान लट्

भवति	भवतः	भवन्ति	प्र० पु०
भवसि	भवथः	भवथ	म० पु०
भवामि	भवावः	भवामः	उ० पु०

लङ्

अभवत्	अभवताम्	अभवन्	प्र० पु०
अभवः	अभवतम्	अभवत	म० पु०
अभवम्	अभवाव	अभवाम	उ० पु०

लृट्

भविष्यति	भविष्यतः	भविष्यन्ति	प्र० पु०
भविष्यसि	भविष्यथः	भविष्यथ	म० पु०
भविष्यामि	भविष्यावः	भविष्यामः	उ० पु०

गुरुकुल कांगड़ी विश्वविद्यालय
वाचस्पति
स्मृति संग्रह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R 876,CHA-S
9136

पं० आचार्य [illegible] प्रति प्रदत्त संग्रह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

GURUKUL KANGRI LIBRARY

	Signature	Date
Accession		20/7/4
Classon		
Catson		
Tag etc	Sharma	23.10.03
Filing		
F A R.		
Any other		
Checked		

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar